॥ सुबालोपनिषत् ॥
बीजाज्ञानमहामोहापह्नवाद्यद्विशिष्यते ।
निर्बीजं त्रैपदं तत्त्वं तदस्मीति विचिन्तये ॥
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ तदाहुः किं तदासीत्तस्मै स होवाच
न सन्नसन्न सदसदिति तस्मात्तमः सञ्जायते
तमसो भूतादिर्भूतादेराकाशमाकाशा-
द्वायुर्वायूग्निरग्नेरापोऽद्भ्यः पृथिवी तदण्डं
समभवत्तत्संवत्सरमात्रमुषित्वा द्विधाकरो-
दधस्ताद्भूमिमुपरिष्टादाकाशं मध्ये पुरुषो
दिव्यः सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुरिति सोऽग्रे भूतानां मृत्युमसृजन्त्र्यक्षरं
त्रिशिरस्कं त्रिपादं खण्डपरशुं तस्य ब्रह्माभिधेति
स ब्रह्माणमेव विवेश स मानसान्सप्त पुत्रानसृजत्तेह
विराजः सत्यमानसानसृजन्तेह प्रजापतयो ब्राह्मणोऽस्य
मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च हृदयात्सर्वमिदं जायते ॥
इति प्रथमः खण्डः ॥
अपानान्निषादा यक्षराक्षसगन्धर्वाश्चास्थिभ्यः
पर्वता लोमभ्य ओषधिवनस्पतयो ललाटात्क्रोधजो रुद्रो
जायते तस्यैतस्य महतो भूतस्य निःश्वसितमेवैतद्यदृग्वदो
यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं
निरुक्तं छन्दो ज्योतिषामयनं न्यायो मीमांसा धर्मशास्त्राणि
व्याख्यानान्युपव्याख्यानानि च सर्वाणि च भूतानि
हिरण्यज्योतिर्यस्मिन्नयमात्माधिक्षियन्ति भुवनानि विश्वा ॥
आत्मानं द्विधाकरोदर्धेन स्त्री अर्धेन पुरुषो देवो भूत्वा
देवानसृजदृषिर्भूत्वा ऋषीन्यक्षराक्षसगन्धर्वान्-
ग्राम्यानारण्यांश्च पशूनसृजदितरा गौरितरोऽनड्वानितरो

वडवेतरोऽश्व इतरा गर्दभीतरो गर्दभ इतरा विश्वम्भरीतरो
विश्वम्भरः सोऽन्ते वैश्वानरो भूत्वा सन्दग्ध्वा सर्वाणि
भूतानि पृथिव्यप्सु प्रलीयत आपस्तेजसि प्रलीयन्ते तेजो वायौ
विलीयते वायुराकाशे विलीयत आकाशमिन्द्रियेष्विन्द्रियाणि
तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्ते भूतादिर्महति
विलीयते महानव्यक्ते विलीयतेऽव्यक्तमक्षरे विलीयते अक्षरं
तमसि विलीयते तमः परे देव एकीभवति परस्तान्न सन्नासन्नासद-
सदित्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥
इति द्वितीयः खण्डः ॥ २॥
असद्वा इदमग्र आसीदजातमभूतमप्रतिष्ठित-
मशब्दमस्पर्शमरूपमरसमगन्धमव्ययम-
महान्तमबृहन्तमजमात्मानं मत्वा धीरो न शोचति ॥
अप्रमाणममुखमश्रोत्रमवागमनोऽतेजस्कमचक्षु-
ष्कमनामगोत्रमशिरस्कमपाणिपादमस्निग्धमलोहित-
मप्रमेयमह्रस्वमदीर्घमस्थूलमनण्वनल्पमपार-
मनिर्देश्यमनपावृतमप्रतर्क्यमप्रकाश्यमसंवृत-
मनन्तरमबाह्यं न तदश्नाति किंचन न तदश्नाति
कश्चनैतद्वै सत्येन दानेन तपसाऽनाशकेन ब्रह्मचर्येण
निर्वेदनेनानाशकेन षडङ्गेनैव साधयेदेतत्त्रयं
वीक्षेत दमं दानं दयामिति न तस्य प्राणा उत्क्रामन्त्यत्रैव
समवलीयन्ते ब्रह्मैव सन्ब्रह्माप्येति य एवं वेद ॥
इति तृतीयः खण्डः ॥ ३॥
हृदयस्य मध्ये लोहितं मांसपिण्डं
यस्मिंस्तद्दहरं पुण्डरीकं कुमुदमिवानेकधा
विकसितं हृदयस्य दश छिद्राणि भवन्ति येषु
प्राणाः प्रतिष्ठिताः स यदा प्राणेन सह
संयुज्यते तदा पश्यति नद्यो नगराणि बहूनि
विविधानि च यदा व्यानेन सह संयुज्यते तदा पश्यति
देवांश्च ऋषींश्च यदापानेन सह संयुज्यते
तदा पश्यति यक्षराक्षसगन्धर्वान्यदा उदानेन
सह संयुज्यते तदा पश्यति देवलोकान्देवान्स्कन्दं
जयन्तं चेति यदा समानेन सह संयुज्यते तदा
पश्यति देवलोकान्धनानि च यदा वैरम्भेण सह
संयुज्यते तदा पश्यति दृष्टं च श्रुतं च भुक्तं
चाभुक्तं च सच्चासच्च सर्वं पश्यति अथेमा
दश दश नाड्यो भवन्ति तासामेकैकस्य द्वासप्ततिर्द्वासप्ततिः

शाखा नाडीसहस्राणि भवन्ति यस्मिन्नयमात्मा स्वपिति
शब्दानां च करोत्यथ यद्द्वितीये सङ्कोशे स्वपिति तदेमं
च लोकं परं च लोकं पश्यति सर्वाञ्छब्दान्विजानाति
स सम्प्रसाद इत्याचक्षते प्राणः शरीरं परिरक्षति हरितस्य
नीलस्य पीतस्य लोहितस्य श्वेतस्य नाड्यो रुधिरस्य पूर्णा
अथात्रैतद्दहरं पुण्डरीकं कुमुदमिवानेकधा विकसितं
यथा केशः सहस्रधा भिन्नस्तथा हिता नाम नाड्यो भवन्ति
हृद्याकाशे परे कोशे दिव्योऽयमात्मा स्वपिति यत्र सुप्तो न
कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति
न तत्र देवा न देवलोका यज्ञा न यज्ञा वा न माता
न पिता न बन्धुर्न बान्धवो न स्तेनो न ब्रह्महा
तेजस्कायममृतं सलिल एवेदं सलिलं वनं भूयस्तेनैव
मार्गेण जाग्राय धावति सम्राडिति होवाच ॥
इति चतुर्थः खण्डः ॥ ४ ॥
स्थानानि स्थानिभ्यो यच्छति नाडी तेषां
निबन्धनं चक्षुरध्यात्मं द्रष्टव्यमधिभूतमादित्यस्तत्राधिदैवतं
नाडी तेषां निबन्धनं यश्चक्षुषि यो द्रष्टव्ये य आदित्ये
यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो
हृद्याकाशे य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतं
नाडी तेषां निबन्धनं यः श्रोत्रे यः श्रोतव्ये यो दिक्षु
यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो
हृद्याकाशे य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
नासाध्यात्मं घ्रातव्यमधिभूतं पृथिवी तत्राधिदैवतं
नाडी तेषां निबन्धनं यो नासायां यो घ्रातव्ये यः
पृथिव्यां यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो
हृद्याकाशे य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
जिह्वाध्यात्मं रसयितव्यमधिभूतं वरुणस्तत्राधिदैवतं
नाडी तेषां निबन्धनं यस्त्वचि यः स्पर्शयितव्ये
यो वरुणे यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो
हृद्याकाशे य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममममृतमभयमशोकमनन्तम् ॥
त्वगध्यात्मं स्पर्शयितव्यमधिभूतं वायुस्तत्राधिदैवतं

नाडी तेषां निबन्धनं यस्त्वचि यः स्पर्शयितव्ये यो वायौ
यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे
य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
मनोऽध्यात्मं मन्तव्यमधिभूतं चन्द्रस्तत्राधिदैवतं
नाडी तेषां निबन्धनं यो मनसि यो मन्तव्ये यश्चन्द्रे
यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे
य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
बुद्धिरध्यात्मं बोद्धव्यमधिभूतं ब्रह्मा तत्राधिदैवतं
नाडी तेषां निबन्धनं यो बुद्धौ यो बोद्धव्ये यो ब्रह्मणि
यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे
य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
अहङ्कारोऽध्यात्ममहंकर्तव्यमधिभूतं
रुद्रस्तत्राधिदैवतं नाडी तेषां निबन्धनं
योऽहङ्कारे योऽहंकर्तव्ये यो रुद्रे यो नाड्यां
यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे
य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
चित्तमध्यात्मं चेतयितव्यमधिभूतं
क्षेत्रज्ञस्तत्राधिदैवतं नाडी तेषां निबन्धनं
यश्चित्ते यश्चेतयितव्ये यः क्षेत्रज्ञे यो नाड्यां
यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे
य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
वागध्यात्मं वक्तव्यमधिभूतमग्निस्तत्राधिदैवतं
नाडी तेषां निबन्धनं यो वाचि यो वक्तव्ये योऽग्नौ
यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे
य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
हस्तावध्यात्ममादातव्यमधिभूतमिन्द्रस्तत्राधिदैवतं
नाडी तेषां निबन्धनं यो हस्ते य आदातव्ये य इन्द्रे यो नाड्यां
यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे य
एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥

पादावध्यात्मं गन्तव्यमधिभूतं विष्णुस्तत्राधिदैवतं
नाडी तेषां निबन्धनं यः पादे यो गन्तव्ये यो विष्णौ
यो नाड्यां यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे
य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
पायुरध्यात्मं विसर्जयितव्यमधिभूतं
मृत्युस्तत्राधिदैवतं नाडी तेषां निबन्धनं
यः पायौ यो विसर्जयितव्ये यो मृत्यौ यो नाड्यां
यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे
य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपासीताजरममृतमभयमशोकमनन्तम् ॥
उपस्थोऽध्यात्ममानन्दयितव्यमधिभूतं
प्रजापतिस्तत्राधिदैवतं नाडी तेषां निबन्धनं
य उपस्थे य आनन्दयितव्ये यः प्रजापतौ यो नाड्यां
यः प्राणे यो विज्ञाने य आनन्दे यो हृद्याकाशे
य एतस्मिन्सर्वस्मिन्नन्तरे संचरति सोऽयमात्मा
तमात्मानमुपसीताजरममृतमभयमशोकमनन्तम् ॥
एष सर्वज्ञ एष सर्वेश्वर एष सर्वाधिपतिरेषोऽन्तर्याम्येष
योनिः सर्वस्य सर्वसौख्यैरुपास्यमानो न च सर्वसौख्यान्युपास्यति
वेदशास्त्रैरुपास्यमानो न च वेदशास्त्राण्युपास्यति
यस्यानमिदं सर्वं न च योऽन्नं भवत्यतः परं सर्वनयनः
प्रशास्तान्नमयो भूतात्मा प्राणमय इन्द्रियात्मा मनोमयः
संकल्पात्मा विज्ञानमयः कालात्मानन्दमयो लयात्मैकत्वं
नास्ति द्वैतं कुतो मर्त्यं नास्त्यमृतं कुतो नान्तःप्रज्ञो
न बहिःप्रज्ञो नोभयतःप्रज्ञो न प्रज्ञाघनो न प्रज्ञो
नाप्रज्ञोऽपि नो विदितं वेद्यं नास्तीत्येतन्निर्वाणानुशासनमिति
वेदानुशासनमिति वेदानुशासनम् ॥
इति पञ्चमः खण्डः ॥ ५ ॥
नैवेह किंचनाग्र आसीदमूलमनाधारमिमाः
प्रजाः प्रजायन्ते दिव्यो देव एको नारायणश्चक्षुश्च
द्रष्टव्यं च नारायणः श्रोत्रं च श्रोतव्यं च
नारायणो घ्राणं च घ्रातव्यं च नारायणो जिह्वा च
रसयितव्यं च नारायणस्त्वक् च स्पर्शयितव्यं च
नारायणो मतश्च मन्तव्यं च नरायणो बुद्धिश्च
बोद्धव्यं च नारायणोऽहङ्कारश्चाहंकार्तव्यं च
नारायणश्चित्तं च चेतयितव्यं च नारायणो वाक् च

वक्तव्यं च नारायणो हस्तौ चादातव्यं च नारायणः
पादौ च गन्तव्यं च नारायणः पायुश्च विसर्जयितव्यं
च नारायण उपस्थश्चानन्दयितव्यं च नारायणो धाता
विधाता कर्ता विकर्ता दिव्यो देव एको नारायण आदित्या रुद्रा
मरुतो वसवोऽश्विनावृचो यजूंषि सामानि मन्त्रोऽग्नि-
राज्याहुतिर्नारायण उद्भवः सम्भवो दिव्यो देव एको नारायणो
माता पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायणो विराजा
सुदर्शनाजितासोम्यामोघाकुमारामृतासत्यामध्यमाना-
सीराशिशुतासूरासूर्यास्वराविज्ञेयानि नाडीनामानि दिव्यानि
गर्जति गायति वाति वर्षति वरुणोऽर्यमा चन्द्रमाः कला
कलिर्धाता ब्रह्मा प्रजापतिर्मघवा दिवसाश्चार्धदिवसाश्च
कलाः कल्पाश्चोर्ध्वं च दिशश्च सर्वं नारायणः ॥
पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनतिरोहति ॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥
तदेतन्निर्वाणानुशासनमिति वेदनुशासनमिति वेदानुशासनम् ॥
इति षष्ठः खण्डः ॥ ६ ॥
अन्तःशरीरे निहितो गुहायामज एको नित्यो यस्य पृथिवी
शरीरं यः पृथिवीमन्तरे संचरन् यं पृथिवी न वेद ॥
यस्यापः शरीरं योऽपोन्तरे संचरन्यमापो न विदुः ॥
यस्य तेजः शरीरं यस्तेजोन्तरे संचरन् यं तेजो न वेद ॥
यस्य वायुअः शरीरं यो वायुमन्तरे संचरन् य वायुर्न वेद ॥
यस्याकाशः शरीरं य आकाशमन्तरे संचरन् यमाकाशो न वेद ॥
यस्य मनः शरीरं यो मनोन्तरे संचरन् यं मनो न वेद ॥
यस्य बुद्धिः शरीरं यो बुद्धिमन्तरे संचरन् यं बुद्धिर्न वेद ॥
यस्याहङ्कारः शरीरं योऽहङ्कारमन्तरे संचरन् यमहङ्कारो न वेद ॥
यस्य चित्तं शरीरं यश्चित्तमन्तरे संचरन् यं चित्तं न वेद ॥
यस्याव्यक्तं शरीरं योऽव्यक्तमन्तरे संचरन् यमव्यक्तं न वेद ॥
यस्याक्षरं शरीरं योऽक्षरमन्तरे संचरन् यमक्षरं न वेद ॥
यस्य मृत्युः शरीरं यो मृत्युमन्तरे संचरन् यं मृत्युर्न वेद ॥
स एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः ॥
एतां विद्यामपान्तरतमाय ददावपान्तरतमो ब्रह्मणे ददौ ब्रह्मा
घोराङ्गिरसे ददौ घोराङ्गिरा रैक्वाय ददौ रैक्वो रामाय ददौ
रामः सर्वेभ्यो भूतेभ्यो ददावित्येवं निर्वाणानुशासनमिति
वेदानुशासनमिति वेदानुशासनम् ॥

इति सप्तमः खण्डः ॥ ७॥
अन्तःशरीरे निहितो गुहायां शुद्धः सोऽयमात्मा
सर्वस्य मेदोमांसक्लेदावकीर्णे शरीरमध्येऽत्यन्तोपहते
चित्रभित्तिप्रतीकाशे गन्धर्वनगरोपमे कदलीगर्भवन्निःसारे
जलबुद्बुदवच्चञ्चले निःसृतमात्मानमचिन्त्यरूपं
दिव्यं देवमसङ्गं शुद्धं तेजस्कायमरूपं
सर्वेश्वरमचिन्त्यमशरीरं निहितं गुहायाममृतं
विभ्राजमानमानन्दं तं पश्यन्ति विद्वांसस्तेन लये न पश्यन्ति ॥
इति अष्टमः खण्डः ॥ ८॥
अथ हैनं रैक्वः पप्रच्छ भगवन्कस्मिन्सर्वेऽस्तं
गच्छन्तीति ॥ तस्मै स होवाच चक्षुरेवाप्येति
यच्चक्षुरेवास्तमेति द्रष्टव्यमेवप्येति यो
द्रष्टव्यमेवास्तमेत्यादित्यमेवाप्येति य आदित्यमेवास्तमेति
विराजमेवाप्येति यो विराजमेवास्तमेति प्राणमेवाप्येति यः
प्राणमेवास्तमेति विज्ञानमेवाप्येति यो विज्ञानमेवास्तमे-
त्यानन्दमेवाप्येति य आनन्दमेवास्तमेति तुरीयमेवाप्येति
यस्तुरीयमेवास्तमेति तदमृतमभयमशोकमनन्त-
निर्बीजमेवाप्येतीति होवाच ॥
श्रोत्रमेवाप्येति यः श्रोत्रमेवास्तमेति श्रोतव्यएवाप्येति
यः श्रोतव्यमेवास्तमेति दिशमेवाप्येति यो दिशमेवास्तमेति
सुदर्शनामेवाप्येति यः सुदर्शनामेवास्तमेत्यपानमेवाप्येति
योऽपानमेवास्तमेति विज्ञानमेवाप्येति यो विज्ञानमेवास्तमेति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
नासमेवाप्येति यो नासामेवास्तमेति घ्रातव्यमेवाप्येति
यो घ्रातव्यमेवास्तमेति पृथिविमेएवाप्येति यः पृथिवीएवास्तमेति
जितामेवाप्येति यो जितामेवास्तमेति व्यानमेवाप्येति यो
व्यानमेवास्तमेति विज्ञानमेवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
जिह्वामेवाप्येति यो जिह्वामेवास्तमेति रसयितव्यमेवाप्येति
यो रसयितव्यमेवास्तमेति वरुणमेवाप्येति यो वरुणमेवास्तमेति
सौम्यामेवाप्येति यः सौम्यामेवास्तमेत्युदानमेवाप्येति
य उअदानमेवास्तमेति विज्ञानमेवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
त्वचमेवाप्येति यस्त्वचमेवास्तमेति स्पर्शयितव्यमेवाप्येति
यः स्पर्शैतव्यमेवास्तमेति वायुमेवाप्येति यो वायुमेवास्तमेति
मोधामेवाप्येति यो मोधामेवास्तमेति समानमेवाप्येति

यः समानमेवास्तमेति विज्ञानएवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
वाचमेवाप्येति यो वाचमेवास्तमेति वक्तव्यमेवाप्येति
यो वक्तव्यमेवास्तमेत्यग्निमेवाप्येति योऽग्निमेवास्तमेति
कुमारामेवाप्येति यः कुमारामेवास्तमेति वैरम्भ-
मेवाप्येति यो वैरम्भमेवास्तमेति विज्ञानमेवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
हस्तमेवाप्येति यो हस्तमेवास्तमेत्यादातव्यमेवाप्येति
य आदातव्यमेवास्तमेतीन्द्रमेवाप्येति य इन्द्रमेवास्त-
मेत्यमृतामेवाप्येति योऽमृतामेवास्तमेति मुख्यमेवाप्येति
यो मुख्यमेवास्तमेति विज्ञानमेवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
पादमेवाप्येति यः पादमेवास्तमेति गन्तव्यमेवाप्येति
यो गन्तव्यमेवास्तमेति विष्णुमेवाप्येति यो विष्णुमेवास्तमेति
सत्यामेवाप्येति यः सत्यामेवास्तमेत्त्यन्तर्याममेवाप्येति
योऽन्तर्याममेवास्तमेति विज्ञानमेवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
पायुमेवाप्येति यः पायुमेवास्तमेति विसर्जयितव्यमेवाप्येति
यो विसर्जयितव्यमेवास्तमेति मृत्युमेवाप्येति यो मृत्युमेवास्तमेति
मध्यमामेवाप्येति यो मध्यमामेवास्तमेति
प्रभञ्जनमेवाप्येति यः प्रभञ्जनमेवास्तमेति विज्ञानमेवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
उपस्थमेवाप्येति य उपस्थमेवास्तमेत्यानन्दयितव्यमेवाप्येति
य आनन्दयितव्यमेवास्तमेति प्रजापतिमेवाप्येति यः प्रजापति-
मेवास्तमेति नासीरामेवाप्येति यो नासीरामेवास्तमेति
कुमारमेवाप्येति यः कुमारमेवास्तमेति विज्ञानमेवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
मन एवाप्येति यो मन एवास्तमेति मन्तव्यमेवाप्येति
यो मन्तव्यमेवास्तमेति चन्द्रमेवाप्येति यश्चन्द्रमेवास्तमेति
शिशुमेवाप्येति यः शिशुमेवास्तमेति श्येनमेवाप्येति यः
श्येनमेवास्तमेति विज्ञानमेवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
बुद्धिमेवाप्येति यो बुद्धिमेवास्तमेति बोद्धव्यमेवाप्येति
यो बोद्धव्यमेवास्तमेति ब्रह्माणमेवाप्येति यो
ब्रह्माणमेवास्तमेति सूर्यामेवास्तमेति यः सूर्यामेवास्तमेति
कृष्णमेवाप्येति यः कृष्णमेवास्तमेति विज्ञानमेवाप्येति

तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
अहङ्कारमेवाप्येति योऽहङ्कारमेवास्तमे-
त्यहङ्कर्तव्यमेवाप्येति योऽहङ्कर्तव्यमेवास्तमेति
रुद्रमेवाप्येति यो रुद्रमेवास्तमेत्यसुरामेवाप्येति
योऽसुरामेवास्तमेति श्वेतमेवाप्येति यः श्वेतमेवास्तमेति
विज्ञानमेवाप्येति तदमृतमभयमशोकमनन्त-
निर्बीजमेवाप्येतीति होवाच ॥
चित्तमेवाप्येति यश्चित्तमेवास्तमेति चेतयितव्यमेवाप्येति
यश्चेतयितव्यमेवास्तमेति क्षेत्रज्ञमेवाप्येति यः
क्षेत्रज्ञमेवास्तमेति भास्वतीमेवाप्येति यो भास्वती-
मेवास्तमेति नागमेवाप्येति यो नागमेवास्तमेति विज्ञान-
मेवाप्येति यो विज्ञामेवास्तमेत्यानन्दमेवाप्येति य
आनन्दमेवास्तमेति तुरीयमेवाप्येति यस्तुरीयमेवास्तमेति
तदमृतमभयमशोकमनन्तं निर्बीजमेवाप्येति
तदमृतमभयमशोकमनन्तनिर्बीजमेवाप्येतीति होवाच ॥
य एवं निर्बीजं वेद निर्बीज एव स भवति न जायते
न म्रियते न मुह्यते न भिद्यते न दह्यते न छिद्यते
न कम्पते न कुप्सते सर्वदहनोऽयमात्मेत्याचक्षते
नैवमात्मा प्रवचनशतेनापि लभ्यते न बहुश्रुतेन
न बुद्धिज्ञानाश्रितेन न मेधया न वेदैर्न यज्ञैर्न
तपोभिरुग्रैर्न सांख्यैर्न योगैर्नाश्रमैर्नान्यैरात्मा-
नमुपुलभन्ते प्रवचनेन प्रशंसया व्युत्थानेन तमेतं
ब्राह्मणा शुश्रुवांसोऽनूचाना उपलभन्ते शान्तो
दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं
पश्यति सर्वस्यात्मा भवति य एवं वेद ॥
इति नवमः खण्डः ॥ ९ ॥
अथ हैनं रैक्वः पप्रच्छ भगवन्कस्मिन्सर्वे
संप्रतिष्ठिता भवन्तीति रसातललोकेष्विति होवाच
कस्मिन्रसातललोका ओताश्च प्रोताश्चेति भूर्लोकेष्विति
होवाच कस्मिन्भूर्लोका ओताश्च प्रोताश्चेति
भुवर्लोकेष्विति होवाच कस्मिन्भुवर्लोका ओताश्च
प्रोताश्चेति सुवर्लोकेष्विति होवाच कस्मिन्सुवर्लोका
ओताश्च प्रोताश्चेति महर्लोकेष्विति होवाच कस्मिन्महर्लोका
ओताश्च प्रोताश्चेति जनोलोकेष्विति होवाच कस्मिन् जनोलोका
ओताश्च प्रोताश्चेति तपोलोकेष्विति होवाच कस्मिंस्तपोलोका
ओताश्च प्रोताश्चेति सत्यलोकेष्विति होवाच कस्मिन्सत्यलोका

ओताश्च प्रोताश्चेति प्रजापतिलोकेष्विति होवाच
कस्मिन्प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेष्विति
होवाच कस्मिन्ब्रह्मलोका ओताश्च प्रोताश्चेति सर्वलोका
आत्मनि ब्रह्मणि मणय इवौताश्च प्रोताश्चेति
स होवाचैवमेतान् लोकानात्मनि प्रतिष्ठितान्वेदात्मैव
स भवतीत्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति
वेदानुशासनम् ॥
इति दशमः खण्डः ॥ १० ॥
अथ हैनं रैक्वः पप्रच्छ भगवन्वोऽयं
विज्ञानघन उत्क्रामन्स केन कतरद्वाव
स्थानमुत्सृज्यापक्रामतीति तस्मै स होवाच
हृदयस्थ मध्ये लोहितं मांसपिण्डं
यस्मिऽन्स्तद्दहरं पुण्डरीकं कुमुदमिवानेकधा
विकसितं तस्य मध्ये समुद्रः समुद्रस्य मध्ये
कोशस्तस्मिन्नाड्यश्चतस्रो भवन्ति रमारमेच्छाऽपुनर्भवेति
तत्र रमा पुण्येन पुण्यं लोकं नयत्यरमा पापेन
पापमिच्छया यत्स्मरति तदभिसंपद्यते अपुनर्भवया
कोशं भिनत्ति कोशं भित्त्वा शीर्षकपालं भिनत्ति
शीर्षकपालं भित्त्वा पृथिवीं भिनत्ति पृथिवीं भित्त्वापो
भिनत्त्यापो भित्त्वा तेजो भिनत्ति तेजो भित्त्वा वायुं भिनत्ति वायुं
भित्त्वाकाशं भिनत्त्याकाशं भित्त्वा मनो भिनत्ति
मनो भित्त्वा भूतादिं भिनत्ति भूतादिं भित्त्वा महान्तं
भिनत्ति महान्तं भित्त्वाव्यक्तं भिनत्त्यव्यक्तं भित्त्वाक्षरं
भिनत्त्यक्षरं भित्त्वा मृत्युं भिनत्ति मृत्युर्वै परे देव
एकीभवतीति परस्तान्न सन्नासन्न सदसदित्येतन्निर्वाणा-
नुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥
इत्येकादशः खण्डः ॥ ११ ॥
ॐ नारायणाद्वा अन्नमागतं पक्वं ब्रह्मलोके
महासंवर्तके पुनः पक्वमादित्ये पुनः पक्वं
क्रव्यादि पुनः पक्वं जालकिलक्लिन्नं पर्युषितं
पूतमन्नमयाचितमसंक्लृप्तमश्नीयान्न कंचन याचेत ॥
इति द्वादशः खण्डः ॥ १२ ॥
बाल्येन तिष्ठासेद्बालस्वभावोऽसङ्गो निरवद्यो
मौनेन पाण्डित्येन निरवधिकारतयोपलभ्येत
कैवल्यमुक्तं निगमनं प्रजापतिरुवाच महत्पदं
ज्ञात्वा वृक्षमूले वसेत कुचेलोऽसहाय एकाकी

समाधिस्थ आत्मकाम आप्तकामो निष्कामो
जीर्णकामो हस्तिनि सिंहे दंशे मशके नकुले
सर्पराक्षसगन्धर्वे मृत्यो रूपाणि विदित्वा न बिभेति
कुतश्चनेति वृक्षमिव तिष्ठासेच्छिद्यमानोऽपि
न कुप्येत न कम्पेतोत्पलमिव तिष्ठासेच्छिद्यमानोऽपि
न कुप्येत न कम्पेताकाशमिव तिष्ठासेच्छिद्यमानोऽपि
न कुप्येत न कम्पेत सत्येन तिष्ठासेत्सत्योऽयमात्मा
सर्वेषामेव गन्धानां पृथिवी हृदयं सर्वेषामेव
रसानामापो हृदयं सर्वेशामेव रूपाणां तेजो
हृदयं सर्वेषामेव स्पर्शानां वायुर्हृदयं
सर्वेषामेव शब्दानामाकाशं हृदयं सर्वेषामेव
गतीनामव्यक्तं हृदयं सर्वेषामेव सत्त्वानां
मृत्युर्हृदयं मृत्युर्वै परे देव एकीभवतीति परस्तान्न
सन्नासन्न सदसदित्येतन्निर्वाणानुशासनमिति
वेदानुशासनमिति वेदानुशासनम् ॥
इति त्रयोदशः खण्डः ॥१३॥
ॐ पृथिवी वान्नमापोऽन्नादा आपो वान्नं
ज्योतिरन्नादं ज्योतिर्वान्नं वायुरन्नादो
वायुर्वान्नमाकाशोऽन्नाद आकाशो
वान्नमिन्द्रियाण्यन्नादानीन्द्रियाणि वान्नं
मनोऽन्नादं मनो वान्नं बुद्धिरन्नादा
बुद्धिर्वानमव्यक्तमन्नदमव्यक्तं
वान्नमक्षरमन्नादमक्षरं वान्नं
मृत्युरन्नादो मृत्युर्वै परे देव एकीभवतीति
परस्तान्न सन्नासन्न सदसदित्येतन्निर्वाणा-
नुशासनमिति वेदानुशासनमिति वेदानुशासनम् ॥
इति चतुर्दशः खण्डः ॥१४॥
अथ हैनं रैक्वः पप्रच्छ भगवन्योऽयं
विज्ञानघन उत्क्रामन्स केन कतरद्वाव
स्थानं दहतीति तस्मै स होवाच योऽयं
विज्ञानघन उत्क्रामन्प्राणं दहत्यपानं
व्यानमुदानं समानं वैरम्भं मुख्य-
मन्तर्यामं प्रभञ्जनं कुमारं श्येनं
श्वेतं कृष्णं नागं दहति पृथिव्यापस्तेजो-
य्वाकाशं दहति जागरितं स्वप्नं सुषुप्तं
तुरीयं च महतां च लोकं परं च लोकं

दहति लोकालोकं दहति धर्माधर्मं दहत्यभास्कर-
ममर्यादं निरालोकमतः परं दहति महान्तं
दहत्यव्यक्तं दहत्यक्षरं दहति मृत्युं दहति
मृत्युर्वै परे देव एकीभवतीति परस्तान्न सन्नासन्न
सदसदित्येतन्निर्वाणानुशासनमिति वेदानुशासनमिति
वेदानुशासनम् ॥
इति पञ्चदशः खण्डः ॥ १५ ॥
सौबालबीजब्रह्मोपनिषन्नाप्रशान्ताय
दातव्या नापुत्राय नाशिष्याय नासंवत्सर-
रात्रोषिताय नापरिज्ञातकुलशीलाय दातव्या नैव
च प्रवक्तव्या । यस्य देवे परा भक्तिर्यथा देवे
तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते
महात्मन इत्येतन्निर्वाणानुशासनमिति
वेदानुशासनमिति वेदानुशासनम् ॥
इति षोडशः खण्डः ॥ १६ ॥
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः ॥
॥ इति सुबालोपनिषत्समाप्ता ॥

Please send corrections to sanskrit@cheerful.com
Last updated January 5, 2000